अन्त: अभ्यन्तरे ।
"करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुत: शीतमन्तत: ।"
अन्तत: हस्तपादादित: । * । शीतादिदाहा-
दिज्वरयोस्त्रिदोषजत्वमाह ।
"द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्ब्बस्तयो: कष्ट: सुखसाध्यतमोऽपर: ।"
संसर्गजौ सान्निपातिकौ । कष्ट: कष्टसाध्य: ।*।
विषमज्वरविशेषानाह ।
"विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्धं शीतलं देहं चार्द्धमुष्णं प्रजायते ।"
अन्नरसे विदग्धे आहारजे रसे दुष्टे श्लेष्मपित्ते
च व्यवस्थिते दुष्टे स्थिते तेन हेतुना शीतलं
कफेन उष्णं पित्तेन अर्द्धत्वं चार्द्धनारीश्वरा-
कारेण नरसिंहाकारेण वा ।
"काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थित: ।
तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयो: ।"
अन्ते हस्तपादादौ ।
"काये श्लेष्मा यदा दुष्ट: पित्तञ्चान्ते व्यवस्थित: ।
शीतत्वं तेन गात्रे स्यादुष्णत्वं हस्तपादयो: ।"
विषमज्वरविशेषस्य प्रलेपकस्य लक्षणमाह ।
"प्रलिम्पन्निव गात्राणि घर्म्मेण गौरवेण च ।
मन्दज्वरविलेपी च सशीत: स्यात् प्रलेपक: ।"
गौरवेण उपलक्षित: । मन्दज्वरविलेपी मन्द-
वेगस्य ज्वरस्य सदा सम्बन्धोऽस्यास्तीति मन्द-
ज्वरविलेपी अयं विषमज्वर: । यथा च सुश्रुत: ।
प्रलेपकाख्यो विषम: प्राय: क्षयाय शोषिणा-
मिति । * । अथ विषमज्वराणां सामान्य-
चिकित्सा ।
"ज्वराश्च विषमा: सर्व्वे सन्निपातसमुद्भवा: ।
अथोल्वणस्य दोषस्य तेषु कार्य्यं चिकित्सितम् ।
विषमेष्वथ कर्त्तव्यमूर्द्धं चाधश्च शोधनम् ।
स्निग्धोष्णैरन्नपानैश्च शमयेद्विषमज्वरम् ।*।
कालिङ्गक: पटोलस्य पत्रं कटुकरोहिणी ।
पटोलं सारिवा मुस्तं पाठा कटुकरोहिणी ।
निम्ब: पटोलस्त्रिफला मृद्वीका मुस्तवत्सकौ ।
किराततिक्तममृता चन्दनं विश्वभेषजम् ।
गुडूच्यामलकं मुस्तमर्द्धश्लोकसमापना: ।
कषाया: शमयन्त्याशु पञ्च पञ्चविधज्वरम् ।"
कालिङ्गक: इन्द्रयव: । वत्सक: कुटज: । चन्दन-
मत्र रक्तचन्दनम् । कषाया: पञ्च । पञ्चविधं
सन्ततसतताऽन्येद्युष्कतृतीयचतुर्थकरूपम् । * ।

"महाबलामूलमहौषधाभ्यां
क्वाथो निहन्याद्विषमज्वरं हि ।
शीतं सकम्पं परिदाहयुक्तं
विनाशयेत् द्वित्रिदिनं प्रयोगात् ।*।
क्षुद्रामृतानागरपुष्कराह्वै:
कृत: कषाय: कफमारुतोत्तरे ।
सश्वासकासारुचिपार्श्वरुग्ज्वरे
सदा त्रिदोषप्रभवेऽपि शस्यते ।"*।

क्षुद्रादि । * ।

"क्षुद्रामृतापद्मकचन्दनैर्घनै-
र्भूनिम्बपर्पटपटोलपौष्करै: ।
तिक्ताकलिङ्गपिचुमर्द्दवासकै-
र्महौषधं भार्गिवितुन्नकै: समै: ।
शृतं पिबेत् पूर्ब्बदिनं कषायं
निहन्ति हृद्ज्वरसुग्रशीतम् ।
सश्वासमूर्च्छारुचिदाहमुख्यां
तृष्णां वमिं कासमतीव शूलकम् ।
श्वासादिहिक्कादिषु सन्निपाते
गलग्रहे तन्द्रिशिरोरुहायाम् ।"

इहन्तुक्षुद्रादिविषमज्वरे । * ।
"मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाथ: ।
पीत: सकणाचूर्ण: समधुर्विषमज्वरं हन्ति ।*।
तिलतैलसवणयुक्तकल्को लशुनसेवित: प्रात: ।
विषमज्वरमपहरते वातव्याधीनशेषांश्च । * ।
काकजाङ्घी तु सगुड़ा विषमज्वरनाशिनी ।
मधुनाढ्याभया लीढ़ा हन्त्याशुविषमज्वरान् ।"
काकजाङ्घी मगरेला इति लोके । सा च
किञ्चिद्भृष्टा गुड़तुल्या कर्षमिता भक्षणीया ।*
"पीतो मरीचचूर्णेन तुलसीपत्रजो रस: ।
द्रोणपुष्पीभवो वापि निहन्ति विषम-
ज्वरान् । * ।
अमृताया: शतं चूर्णं वासया परिशोधितम् ।
पृथक् षोड़शभागा: स्युर्गुड़माक्षिकसर्पिषाम् ।
यथाग्नि भक्षयेदेतन्नरो हितमिताशन: ।
नास्य कश्चिद्भवेद्व्याधिर्न जरा पलितं न च ।
न ज्वरा विषमा नैव मेहनानिलरक्तकम् ।
न च नेत्रगता रोगा: परमेतद्रसायनम् ।
मेधाकरं त्रिदोषघ्नं प्रयोगादस्य बुद्धिमान् ।
जीवद्वर्षशतं सार्यं यथैवादितिजस्तथा ।"
गुड़ूचीकल्क: । * । अथान्नमाह ।
"तक्रमांसं पयोमांसं दधिमांसमथापि वा ।
मासमांसञ्च भुञ्जानो मुच्यते विषमज्वरात् ।"*
अग्निवेशश्च ।
"सुरा समण्डा पानाय भोजने चरणायुधा: ।
तित्तिरा विष्किरा: पथ्या: कुक्कुटा विषमज्वरे ।
चरणायुधा गृहकुक्कुटा: । कुक्कुटा वनकुक्कुटा: ।
विष्किरा: वर्त्तिकालावविगिरचकोराद्या: । *।
अथ सन्ततादीनां विशिष्टा चिकित्सा ।
"त्रायन्तीकटुकानन्तासारिवाभि: शृतं जलम् ।
सन्तताख्ये ज्वरे देयं वातादीनां निवृत्तये ।"
अनन्ता दुरालभा । * ।
"पटोलाब्दनिशातिक्तासारिवाभि: शृतं जलम् ।
सन्तताख्ये ज्वरे देयं वातादीनां निवृत्तये ।"
इमा इहद्दन्ती एरण्डवत्पत्रविटपा तदलाभे
दन्ती च ग्राह्या समानगुणत्वात् । * ।
"पटोलेन्द्रयवानन्तापथ्यारिष्टामृताजलम् ।
क्वथितं तज्जलं पीतं ज्वरं सन्ततकं जयेत् ।"
अनन्ता सारिवा । अरिष्ट: निम्ब: । जलं
बालकम् । * ।
"द्राक्षापटोलनिम्बाब्दशक्राह्वत्रिफलामृतम् ।
जलं जन्तु: पिबेत् क्षीप्रमन्येद्युर्ज्वरशान्तये ।"
शक्राह्व: इन्द्रयव: । * ।

"कर्म्मसाधारणं त्यक्त्वा तृतीयकचतुर्थकौ ।
भिषजा प्रतिकर्त्तव्यौ विशेषोक्तचिकित्सितै: ।
उशीरं चन्दनं मुस्तं गुडूचीधान्यनागरम् ।
अम्भसा क्वथितं पेयं शर्करामधुयोजितम् ।*।
ज्वरे तृतीयके पुंसां तृष्णादाहसमन्विते ।
अपामार्गजटा कट्यां लोहितै: सप्ततन्तुभि: ।
बद्धा वारे रवेस्तूर्णं ज्वरं हन्ति तृतीयकम् ।*।
स्थिरातामलकीदारुशिवाहृष्टमहौषधै: ।
सितामधुयुत: क्वाथश्चतुर्थकहर: पर: ।"
स्थिरा शालिपर्णी । तामलकी भूम्यामलकी । शिवा
हरीतकी । हृष्टो वासा । * ।

"अगस्तिपत्रस्य रसेन नस्यं
निहन्ति चातुर्थकमुग्रवीर्य्यम् ।
शिरीषपुष्पस्य निशाद्वयस्य
कल्केन वा तत्कृतसंयुतेन ।"

तत् नस्यम् । * ।
"ज्वरस्य वेगकालञ्च चिन्तयन् ज्वर्य्यते तु य: ।
तस्येष्टैरद्भुतैश्चापि विषयैर्नाशयेत् स्मृतिम् ।
सन्ततं विषमञ्चापि क्षीणस्य सुचिरोत्थितम् ।
ज्वरं सभोजनै: पथ्यैर्ल्लंघनै: समुपाचरेत् ।"*।
सततादिविपर्य्ययाणां विषमज्वराणां चिकित्सा
सततादीनामिव कर्त्तव्या ।
"शीताभिभूते पुरुषे कुर्य्याच्छीतहरीं क्रियाम् ।
दाहाभिभूते तु विधिं विदध्याद्दाहनाशनम् ।
आच्छादनैश्चोत्तरैर्गुरुभि: कम्बलादिभि: ।
तूलवत्या महाशीतं शीतादिज्वरिणो हरेत् ।"
तूलवती तुलाई इति लोके ।
"तं स्तनाभ्यां सुपीनाभ्यां पीवरोरुनितम्बिनी ।
युवतिर्गाढ़मालिङ्गेत्तेन शीतं प्रशाम्यति ।
कान्ताङ्गसङ्गसंजातं तस्य शीते निवारिते ।
प्रह्लादं चास्य विज्ञाय पृथक् तां कारयेत्
स्त्रियम् ।
ततो दाहे तु संजाते पद्मैरेरण्डसम्भवै: ।
शीतलैर्धारितैर्देहे दाहं तस्यापनोदयेत् ।
तालकं शुक्तिकाचूर्णं तुल्यं तच्चोभयोरपि ।
नवमांसञ्च तुल्यं स्यात् मर्द्दयेत् कन्यकाद्रवै: ।
तत् तु संशुष्कसुपत्रैर्वन्यैर्गजपुटै: पचेत् ।
शीतं तच्चूर्णयेच्चूर्णं गुञ्जामात्रं सितायुतम् ।
प्रभाते भक्षयेत्तेन याति शीतज्वरच्चयम् ।
वान्तिर्भवति कस्यापि कस्यापि न भवत्यपि ।
एकेन दिवसेनैव शीतज्वरहरं परम् ।
मध्याह्नसमये पथ्यं शिखरिणी भक्तकं च ।"*।
शीतज्वरे भूतभैरवचूर्णम् ।
"एला जातीफलं व्योषत्रिफलाजीरकं घन: ।
सविड़ङ्गं सितायुक्तं चूर्णं शीतज्वरापहम् ।
कायस्थानाकुलीतिक्तावयस्थापुरचोरकै: ।
सहदेवावचाकुष्ठै: शीतघ्नैर्घूपधूपनै: ।
एतैरेवौषधै: पिष्टैस्तैलक्षारसंयुतै: ।
साम्लैर्व्विपाचितं तैलमभ्यङ्गाच्छीतनाशनम् ।"
कायस्था हरितकी । नाकुली रास्ना । भेदधाई
इति लोके । वयस्था गुडूची । पुरो गुग्गुलु: ।
चोरक: । भटिउर । तदलाभे गठियन । सह-